# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री-1 (SEM-2)** | **प्रश्नपत्रम् – 7** | गुणाः –70

विषयः – पुराणेतिहासः | **कोड –C.E.1.2.2(New/Old)** | समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –18/04/2019 | सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणे तृतीयस्कन्धः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 द्वयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या।** **10**

(1) अहो बली यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी।
लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम् ॥

(2) कृतं त्रेता द्वापरं चकलिश्चेति चतुर्युगम्।
दिव्यैर्द्वादशाभिर्वर्षैः सावधानं निरूपितम् ॥

(3) लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे।
यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्यनिमिषाय नमोऽस्तु तस्मै ॥

**प्रश्नः-2 उद्धवविदूरयोः मेलनं यथाग्रन्थं वर्णयत।** **10**

**अथवा**

**भगवतः विविधानां लीलानां वर्णनं कुरुत।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 द्वयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या।** **10**

(1) त्वायादानं तपः सत्यं धर्मस्येति पदानि च।
आश्रमांश्च यथा सद्रव्यमसृजत्सह वृत्तिभिः ॥

(2) यदा तु भवतः शीलश्रुतिरूपवचोगुणान्।
अश्रुणोन्नारदादेषा त्वय्यासीत्कृतनिश्चया ॥

(3) कामः स भूमान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः।
क एव ते तनयां नाद्रियेत स्वयैव कान्त्या क्षिपतीनिव श्रियम् ॥

**प्रश्नः-4 वाराहावतारकथां पूर्वापरसन्दर्भसहितां लिखत।** **10**

**अथवा**

**हिरण्याक्षयस्य वधकथां सनत्कुमारशापसहितां लिखत।**

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भंप्रसङ्गं व्याख्या कार्या।** **10**

(1) नेह यत्कर्म धर्माय न विरागाय कल्पते।
न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥

(2) सतां प्रसङ्गान्मम वीर्यसंविदो भवन्तिहृत्कर्णरसायनाः कथाः।
तज्जोषणादास्चयवर्णवर्त्मनि श्रद्धा रतिर्भनितरनुक्रमिष्यति ॥

(3) भक्तियोगेश्च योगश्च मया मानव्युदीरितः।
ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥

**प्रश्नः-6 कर्दभऋषेः तपश्चर्यां विवर्ण्य कपिलजन्मकथां च लिखत।** **10**

**अथवा**

**प्रकृतिपुरुषयोः विवेकेन मोक्षप्राप्तिं विलिख्य अष्टाङ्गयोगं लिखत।**

**प्रश्नः-7 दशानां लघूत्तराणि लिखत।** **10**

(1) अष्टाङ्गयोगस्य लीलायाः नाम किम्?
(2) तृतीयस्कन्धे कति अध्यायाः सन्ति?
(3) बली अर्थात् का?
(4) उद्धवः कस्मै भगवल्लीलां श्रावयति?
(5) केषां शापात् जयाविययोः पतनं भवति?
(6) हिरण्यकशिपोः मातुः नाम किम्?
(7) हिरण्याक्षस्य पितुः नाम किम्?
(8) कर्दमऋषेः आश्रमः कस्या नद्याः तटे आसीत्?
(9) कपिलेन देवहूत्यै प्रदत्तोपदेशस्थानं किम्?
(10) प्राणायामः कतिविधः?
(11) यमाः के?
(12) नियमाः के?
(13) प्रकृतिपुरुषयोः प्रतिपाद्यं शास्त्रं किम्?
(14) कपिलस्य कति भगिन्यः आसन्?
(15) महत् तत्त्वं अर्थात् किम्?